# Vyasakritam Kaveri Stotram

# व्यासकृतं कावेरीस्तोत्रम्

## Document Information

Text title : vyAsakRRitaMkAverIstotram 3

File name : vyAsakRRitaMkAverIstotram3.itx

Category : devii, nadI, devI

Location : doc_devii

Proofread by : Prabha Maruvada

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2024

*sanskritdocuments.org*

Vyasakritam Kaveri Stotram

# व्यासकृतं कावेरीस्तोत्रम्

श्रीगणेशाय नमः ।
मातस्सह्यसमुद्भवे भवभयप्रध्वंसिनि त्वत्तटे-
नित्यं संवसतां सतां करगता कैवल्यलक्ष्मीरिति ।
वादः कैमुतिकस्तवैष सकृदप्यावातिवीचीमरु-
न्नीचैर्यत्र भवन्ति तत्र वसतां सर्वे पुमथार्यतः ॥ १॥

भुग्नः पापभरेणमज्जतिजडो यः कश्चन त्वज्जले
संसाराम्बुनिधेर्नकेवलमसावुन्मज्जतिद्राग्स्त्वयम् ।
किन्तु स्वानवरान् परांश्चपुरुषानुत्तारयन्सह्यजे-
धन्यः किं बहना पुनाति सकलान् दृग्गोचरानप्यहो ॥ २॥

स्वल्पावग्रहशुष्कसस्य निचया ग्रीष्मोष्मसंशोषिता
शेषारामसरस्तटाकनिकराः के वा नदी मातृकाः ।
क्लिश्यन्ते बत ! नेतरे जनपदाश्चोलस्तु सन्तर्पितो
नित्यं सहयसुते त्वयाशतभवग्राहांस्तृणं मन्यते ॥ ३॥

मासं तापि कदापि चोलविषयः श्रीरङ्गनाथस्फुर-
??तल्पानल्पमुखानिलेन गरलज्ज्वालावली सोष्मणा ।
इत्थं देवि दयावतीव भवती ग्रीष्मेऽपि संवर्धते-
पूरैर्दूरमितस्ततो विसृमरैराप्यायन्ती भुवम् ॥ ४॥

सप्रागात्मभुवः कमण्डलरथ त्रैविक्रमं तत्पदं-
ताहृग्व्योमतटः सधूर्जटिजटाजूटः सगौरीगुरुः ।
स श्रीब्रह्मगिरिः ससह्यशिखरे धात्रीमयः श्रीहरिः
स्थानानीतिजयन्ति दक्षिणसुरस्त्रोतस्विनि त्वज्जने ॥ ५॥

सह्ये लोके दिवोन्ते तुहिनशिखरिणीत्यादिमध्यावसाने
ष्वासीत्स्वर्गापगा सा विधिहरिहरसंसर्गमासाद्यधन्या ।
पादे सह्यस्य धाता तदनुहरिहरावादरावासमुद्रा-

दम्ब!त्वामाश्रयन्तौ प्रतिपदमखिलानुग्रहं तन्वते ते ॥ ६॥

सह्यक्षोणीधरवरसुते सर्वतीर्थावतारं-
पारावारं सकिल भगवानेकदेशेऽधिशेते ।
आविष्कुर्वस्त्वयि तु परमं प्रेमशेषे शयानो-
रङ्गेशानो भगवति बहुत्रान्तरङ्गे तवास्ते ॥ ७॥

भवस्य त्वं देवि त्रिदशसरितोऽपि प्रियतरा-
विलोभ्येनां व्याजात्क्वचिदपिजडाजूटकुहरे ।
यतश्चोलोद्वे(लेदे)शे प्रतिपदमुपश्लिष्य सततं
गिरीशः प्रेम्णानुव्रजति भवतीमेव सरसाम् ॥ ८॥

वसाम त्वत्तीरे जननि विधिवत्सन्ततमुप-
स्पृशाम त्वन्नीरे चिरमनुसराम श्रुतिपथम् ।
भजाम श्री साम्बं सकलकरणैः सह्यतनये-
सदानन्दाद्वैतामृतसरसि मज्जाम च वयम् ॥ ९॥

तीर्थान्तरे सह्यसुते वसन्तः-
कथञ्चिदेनः क्षपयन्तु सन्तः ।
वृषासना वा गरुडासना वा-
वयं भवेम त्वयि संवसन्तः ॥ १०॥

बुधो दुण्डिर्नाम्ना जगति विदितो लक्ष्मणसुधी-
मणेः श्रीमद्व्यासान्वयजलधिचन्द्रादजनि यः ।
प्रणीतं तेनेदं पठतु सुजनः सह्यदुहितु-
र्महानद्याः स्तोत्रं शुभदमखिलाघौघशमनम् ॥ ११॥

इति श्री ढुण्डिराजव्यासविरचितं कावेरीस्तोत्रं सम्पूर्णम् ।
श्रीरस्तु पठता ।

Proofread by Prabha Maruvada

*Vyasakritam Kaveri Stotram*

pdf was typeset on July 8, 2024

Please send corrections to *sanskrit@cheerful.com*